'not allowed to cook', P. vi.2.157, 158;] (used as noun) **1** (one) who does not cook at home and does not give food to others अपचस्य तु भुक्त्वान्नं द्विजश्चान्द्रायणं चरेत् ŚaṅkhLDS. 461; ParāSm. 11.46 (comm. यस्तु विप्रो विधानेन गार्हस्थं स्वीकृत्य अन्नदानादिवर्जितः केवलं स्वयमेव भुङ्क्ते सोऽपच इत्युच्यते); गृहस्थधर्मा यो विप्रो ददाति परिवर्जितः। ऋषिभिर्धर्मतत्त्वज्ञैरपचः परिकीर्तितः] ParāSm. 11.50; ŚaṅkhLiSm. 14; Aparā. 1177.9 (*on* 3.289); **1B** (one) who is prohibited from cooking (अचूकावशक्तौ) अशक्तौ इति किम्. अपचो दीक्षितः। अपचः परिव्राजकः KāśiVr̥. Vi.2.157; अशक्तौ किम्। अपचो दीक्षितः SiddhāKau. 652 B.1 (*on* vi.2.157) (comm. दीक्षितः शास्त्रविरोधान्न पचति, न त्वशक्तत्वेन) गुणप्रतिषेधे इत्येव, अन्योऽयं पचात् अपचः SiddhāKau. 652B.2 (*on* vi.2.157); **2** (one) who does not cook योऽपचस्य कदर्यस्य भुञ्जीतान्नं द्विजाधमः। तत्क्षणाच्छूद्रवत्स स्यात् BrParāSm. 6.286; परान्नभोजी त्वपचः श्राद्धमत्र तु कारयेत् ViṣṇuDhaP. i.142.22; **3** not able to cook, bad cook (a term of abuse) (अशक्तौ गम्यमानायाम् ...) अपचो यः पक्तुं न शक्नोति KāśiVr̥. vi.2.157; अपचः पक्तुमशक्तः Prasā. ii.780.11; SiddhāKau. 652A.22 (*on* vi.2.157); **4** (one) accused of not cooking अपचोऽयं जाल्मः ...। पक्तुं पठितुं शक्तोऽपि एवमाक्रुश्यते KāśiVr̥. vi.2.158; (आक्रोशे च) आक्रोशार्थे अजुकान्तं नञः परं तथा। अपचोऽयं जाल्मः Prasā. ii.780.13; अपचो जाल्मः पक्तुं न शक्नोतीत्येवमाक्रोश्यते SiddhāKau. 652B.4 (*on* vi.2.158) (comm. पक्तुं शक्तोऽपि पक्तुमयं न शक्नोतीत्यनेन प्रकारेण क्षिप्यते)

**अपचकिता** (apa-cakitā) *adj.* (*f.*) not happy, discontented संहितश्चेत् 'परप्रकृतयो लुब्धक्षीणापचकिताः प्रत्यादानभयात् वा नोपगच्छन्ति' इति पश्येत् ArthaŚā. ii.249.1 (7.3)

**अपचक्षुस्** (apa-cakṣus) *adj.* (used as noun) (one) who has lost the eyes, blind (पन्था देयः ... अपचक्षुषे) अपचक्षुषे अन्धाय VīraMi. (Saṁskāra.) 476.10.

**अपचत्** (apa-cat-) I.P. (*caus.*) to drive away; to frighten अप नात्रम् अप कृत्याम् अप रक्षांसि धन्वा। अमीवाश् चातयामसि AV . (p.) vii.7.3; आ ते बध्नाम्य् ओषधिम्। या त्वायुर् उपाहराद् अप रक्षांसि चातयात् AV. (p.) xiii.13.10; PrāṇāU. 3.

**अपचत्** (a-pacat) *adj.* (used as noun) (one) who is not cooking यथा द्रव्ये त्रैकाल्यं न व्यज्यते तथा शक्तावपीति अपचत्यपि पचतीति स्यात् पक्ष्यति पाचकोऽपाक्षीत् पाचक इत्येव न स्यात् NyāyVār. 200.4 (*on* ii.1.16); न च तदानीमसर्वज्ञः सर्वज्ञात् सामर्थ्यसम्भवात् अपचन्नपि पाचको यथा NyāyKa. 126.9; अपचत्यपि पाकसंबन्धं प्रत्यस्ति स्वरूपशक्तिः TātpaṬ. (Vā.) 24.3 (*on* i.1.11); यत्तु पाककर्तृत्त्वमेव पाचकत्वं तदा अपचति तत्प्रयोगः भूतपूर्वन्यायेनौपचारिकः AdvaiSi. 884.8.

**अपचति** (a-pacati) *gr.* other than the word or expression *pacati* शब्दस्तु पचतिव्यतिरेकेणापचतिरेव भवति Śarka. 66.16.

**अपचतिव्यतिरेक** (apacati-vyatireka) *m.* absence of what is other than the word or expression *pacati* पुनरपि नञि तत्र प्रयुज्यमाने प्रतिषेध्यप्रतिषेध एव प्रतीयते नापचतिव्यतिरेकः Śarka. 66.24.

**अपचन** (a-pacana) *n.* lack of cooking, non-cooking स भगवान्पाकशासनः बदराणामपचनं चकार MahāBhā. ix.47.18.

**अपचन्द्रसूर्य** (apa-candrasūrya) *adj.* from which the Sun and the Moon have gone away अतोऽवगच्छाम्यपचन्द्रसूर्ये यथान्धकारस्य मुखे रजन्याः तथा तयोरक्षिरुचामभूमौ तव प्रगल्भेत परं प्रचारः Rāgh. 13.42.

**अपचमान** (a-pacamāna) *adj.* (used as noun) (one) who does not cook on his own at home तथैवापचमानेभ्यः प्रदेयं गृहमेधिना MahāBhā. iii.2.51; शक्तितोऽपचमानेभ्यो दातव्यं गृहमेधिना ManuSm. 4.32; अपचमाना ब्रह्मचारिपरिव्राजका इत्याहुः ManuBh. i.343.9 (*on* 4.32); अपचमानेभ्यो ब्रह्मचर्यादिभ्यः प्राण्यन्तरेभ्य इव इत्यर्थः ManvaVi. 472.9 (*on* 4.32); ManvaMu. 150.18 (*on* 4.32)

**अपचमानक** (a-pacamānaka) *adj.* (used as noun) (one) who is not eating food cooked on fire वानप्रस्थस्य द्वैविध्यम्। पचमानका अपचमानकाश्चेति BaudhDS. iii.3.2 (comm. अनग्निपक्वाशिनश्चेति सूत्रार्थः); पञ्चैवापचमानका उन्मज्जकाः प्रवृत्ताशिनो मुखेनादायिनस्तोयाहारा वायुभक्षाश्चेति BaudhDS. iii.3.9.

**अपचय** (apa-caya) *m.* **1Ai** decrease, reduction, diminution, lessening **ii** (Astron.) decrease (in passing through the constellation (*bhoga*)) **iii** (Astrol.) name of some houses in the horoscope (*lit.* causing regress) **Bi** destruction, loss, decay, decline **ii** cure (*lit.* destruction of cause of disease) **iii** detraction, i.e. depreciation **C** descent **D** detriment, deterioration **E** short duration (of time) **F** fall **G** degradation **2A** subtraction, deduction **B** (Astron.) (particular sum which is to be subtracted **3A** stealing **B** stealing, i.e. attracting **4** gathering, collection **5A** contraction **B** emaciation **6A** abandonment, giving up **B** deletion **C** removal **7A** weakness **B** (Mus.) weak, i.e. lower note **8** least (number), minimum **9** the word or expression *apacaya* **1Ai** decrease, reduction, diminution, lessening एकापचयेनोत्तरयोः KātyŚS. viii. 3.2. (comm. एकैकस्तनापसारणेन व्रतं दोहयति द्वितीयायां द्विस्तनं तृतीयायामेकस्तनमित्यर्थः); स्तेनः ... कर्माचक्षीत ... अनुज्ञातेऽनुज्ञातारमेनः स्पृशति। ... भक्तापचयेन वात्मानं समाप्नुयात् HirŚS. xxvi.7.4 (103.9); ĀpaDS. i.25.8; ऋतपेयेन स्वर्गकामः फाल्गुनिकस्य घृतस्य चतसृभिरङ्गुलिभिरुपादत्ते तावद्दीक्षासु व्रतमुपसत्स्वङ्गुल्यपचयस्तनस्थाने भक्षयति KāṭhŚSSaṅkalana. 29.15; यदा ... चन्द्रः ... विकृतो भवेत् ... पक्षापचये मध्ये दृश्येत द्वादशी। हन्ति पञ्चनदं तत्र राजानं सुमहद्बलम् AVPari. 50(3).4; पण्यं वणिग्भिरर्थापचयेन देयम् GautDS. ii.1.35 (comm. प्राप्तस्य मूल्यस्य किंचिन्न्यूनतां कल्पयित्वा); पौर्णमास्यां पञ्चदश ग्रासान्भुक्त्वैकापचयेनापरपक्षमश्नीयात् GautDS. iii.9.12 (comm. चतुर्दश्यामेको ग्रासो भवति। अमावस्यायामुपवासः); BaudhDS. iii.8.23; कालो नः ... आयुषोऽपचयं कृत्वा मरणायोपनेष्यति MahāBhā. iii.36.5; BhāgP. iv.11.21; न हीह कश्चिदपि स्वस्मिन्नात्मनि मुहूर्तमप्यवतिष्ठते। वर्धते यावदनेन वर्धितव्यमपचयेन वा युज्यते MahāBh. i.246.6 (*on* i.2.64); येन मूर्तीनामुपचयाश्चापचयाश्च लक्ष्यन्ते तं कालमाहुः MahāBh. i.409.22 (*on* ii.2.5); VākyaP. 3 (9).13; देहादपचयस्तेन तपसा तस्य यः कृतः। स एवोपचयः ... तेजसास्य कृतः BuddhaC. 12.97; प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे BrahmSū. iii.3.12; BrahmaSūBh. (Śaṅ.) 634.8 (*on* iii.3.12); स्रोतसां संनिरोधाच्च रक्तादीनां च संक्षयात्। धातूष्मणां चापचयात् राजयक्ष्मा प्रवर्तते CaraS. vi.8.40 (1941 Ed.); आत्मा शुद्धोऽक्षरः शान्तः निर्गुणः प्रकृतेः परः। प्रवृद्ध्यपचयौ नास्य ViṣṇuP. ii.13.71-72; AgniP. 379.13; आर्षप्रयोगेषु प्रक्षेपापचयं प्रति। न प्रमाद्येत् KāśyaS. 239B.39; क्रूरोदये योऽपचयः स नात्र Br̥hajjā. 7.12; JātaPā. 5.20; स्त्री स्यात्काचिन्मृणाल्यादिर्विवक्षापचये यदि AmaK. 2908; न व्येति उपचयापचयौ न याति इति अव्ययम् GītāBh. (Śaṅ.) 29.17 (*on* 2.17); (आत्मनः) एकस्य निरंशस्य ...। न हि तस्य पूर्वोत्तरकालयोरुपचयोऽपचयो वा स्वरूपभेदोऽस्ति IṣṭaSi. 87.20; पुण्यापुण्ययोरुपचयापचयौ BrahmSūBh. (Bhā.) 4.23 (*on* i.1.1); गन्धः केवलो गृह्यते न तदाधारस्य द्रव्यस्य नासिकादेशागमनं कल्पते। यदि द्रव्यावयवं (? वः) तत्रागच्छेत्कालेन द्रव्यस्यापचयः स्यात् BrahmSūBh. (Bhā.) 136.25 (*on* ii.3.26); उपचयापचयसंघाताद्यपि वक्तव्यम् NyāyMañ. i.294.12; (हीनान्नवस्त्रवेषः स्यात्सर्वदा गुरुसंनिधौ) यदि गुरोस्तादृशमन्नं गृहे न सिद्धं स्यात्, तदा तत्तेन नाशितव्यम्। अथ गुरोरपि तादृशमन्नं स्यात्तदापचयः कर्तव्यः ManuBh. i.179.20 (*on* 2.194); तत्सद्ब्रह्म ... न यत्रोपचयः कश्चित्तथापचयोऽपि च SkandP. iv.26.13; ŚivaP. ii (1).6.10 (43A.15); गन्धादयः परस्परं संहन्यमानाः पृथिव्यादयः ... संहन्यमानानाम् ... यथा यथापचयस्तथा तथा सौक्ष्म्यतारतम्यम् Bhām. 405.13 (*on* ii.2.16); यत्रात्यन्तभिन्नानां गवामुपचयापचयौ देवदत्तोपचयापचयहेतू तत्र कैव कथा गुणेभ्यो भिन्नाभिन्नानां व्यक्तीनामुपजनापाययोः TattvVai. 87.18 (*on* 2.19); यदैवोपचयापचयौ शरीरस्य दृश्येते तदैवोत्पादविनाशौ भविष्यतः TātpaṬ. (Vā.) 5.41.21 (*on* iii.2.10); नर्तकगतेभ्यो रसेभ्यो भावाः सामाजिके ... तत उपचये रसः। ततोऽप्यपचये भाव इति AbhinBhā. i.292.11 (*on* 6.33); रसान्तरतिरस्कारादन्यद्रागाच्च तस्य यः। भवत्यपचयो वृद्धेस्तद्ग्रासं तं प्रचक्षते SaraKaṇṭhā. 557.17; बलस्यापचयो ग्लानिराधिव्याधिप्रकर्षभूः SaraKaṇṭhā. 591.20; PratāYaBhū. 243.8; RasGaṅ. 100.2; तपसोऽपचयं मत्वा देवी हिमगिरीन्द्रजा। भूय एव तपः कर्तुमारेभे BrahmP. 35.60; आयुः क्षेत्राण्यपचयोपचयांश्चैव योऽकरोत् ... त्रातास्ति जगदीश्वरः BhaviP. 235A.12 (i.157.25); PadmP. v.16.30; सदसत्कर्मणां द्रष्टा धर्म एव सनातनः। धर्मे मतिः परो लाभस्तस्य ह्यपचयोऽन्यथा BrDharmaP. i.1.36; शिरःपुच्छाद्यवयवभेदे सति ब्रह्मणोऽप्युपचयापचयौ प्रसज्येयाताम् BrahmSūBh. (Rā.) 625.7 (*on* iii.3.12); VedāntDī. 173.15 (*on* iii.3.12) BrahmSūBh. (Ma.) 54A.3 (*on* iii.3.13) VedāntPāSau. 307.18 (*on* iii.3.12) VedāntKau. 308.1 (*on* iii.3.12); ŚivārkaMaDī. ii.306.15 (*on* iii.3.12); उपचयापचयानर्हतयैकम् BrahmSūBh. (Rā.) 107.7 (*on* i.1.1); (सर्ववचनं प्रकृतिनिर्ह्रासार्थम्) निर्ह्रासः अपचयः। अल्पत्वमित्यर्थः Pradī. iv. 214A.3 (*on* iv.3.100); त्रियवश्चाधरोष्ठः स्याच्छेषश्चापचयस्तयोः SamarāSū. 79.55; पूर्णो भवति सुवृत्तस्तुषाररुचिरपचये वक्रः ĀryāSaŚa. 503; क्रोधोत्साहरतीनां च निजनिजकारणबलादुद्भूतानामपि ...